॥ श्रीः ॥

# देवीभुजंगस्तोत्रम्

॥ अथ देवीभुजंगस्तोत्रम् ॥

विरिञ्च्यादिभिः पञ्चभिर्लोकपालैः

समूढे महानन्दपीठे निषण्णम् ।

धनुर्बाणपाशाङ्कुशप्रोतहस्तं

महस्त्रैपुरं शंकराद्वैतमव्यात् ॥ १॥

यदन्नादिभिः पञ्चभिः कोशजालैः

शिरःपक्षपुच्छात्मकैरन्तरन्तः ।

निगूढे महायोगपीठे निषण्णं

पुरारेरथान्तःपुरं नौमि नित्यम् ॥ २॥

विरिञ्चादिरूपैः प्रपञ्चे विहृत्य

स्वतन्त्रा यदा स्वात्मविश्रान्तिरेषा ।

तदा मानमातृप्रमेयातिरिक्तं

परानन्दमीडे भवानि त्वदीयम् ॥ ३॥

॥ श्रीः ॥

विनोदाय चैतन्यमेकं विभज्य

द्विधा देवि जीवः शिवश्चेति नाम्ना ।

शिवस्यापि जीवत्वमापादयन्ती

पुनर्जीवमेनं शिवं वा करोषि ॥ ४॥

समाकुञ्च्य मूलं हृदि न्यस्य वायुं

मनो भ्रूबिलं प्रापयित्वा निवृत्ताः ।

ततः सच्चिदानन्दरूपे पदे ते

भवन्त्यम्ब जीवाः शिवत्वेन केचित् ॥ ५॥

शरीरेऽतिकष्टे रिपौ पुत्रवर्गे

सदाभीतिमूले कलत्रे धने वा ।

न कश्चिद्विरज्यत्यहो देवि चित्रं

कथं त्वत्कटाक्षं विना तत्त्वबोधः ॥ ६॥

शरीरे धनेऽपत्यवर्गे कलत्रे

विरक्तस्य सद्देशिकादिष्टबुद्धेः ।

यदाकस्मिकं ज्योतिरानन्दरूपं

समाधौ भवेत्तत्त्वमस्यम्ब सत्यम् ॥ ७॥

॥ श्रीः ॥

मृषान्यो मृषान्यः परो मिश्रमेनं

परः प्राकृतं चापरो बुद्धिमात्रम् ।

प्रपञ्चं मिमीते मुनीनां गणोऽयं

तदेतत्त्वमेवेति न त्वां जहीमः ॥ ८॥

निवृत्तिः प्रतिष्ठा च विद्या च शान्ति-

स्तथा शान्त्यतीतेति पञ्चीकृताभिः ।

कलाभिः परे पञ्चविंशात्मिकाभि-

स्त्वमेकैव सेव्या शिवाभिन्नरूपा ॥ ९॥

अगाधेऽत्र संसारपङ्के निमग्नं

कलत्रादिभारेण खिन्नं नितान्तम् ।

महामोहपाशौघबद्धं चिरान्मां

समुद्धर्तुमम्ब त्वमेकैव शक्ता ॥ १०॥

समारभ्य मूलं गतो ब्रह्मचक्रं

भवद्दिव्यचक्रेश्वरीधामभाजः ।

महासिद्धिसंघातकल्पद्रुमाभा-

नवाप्याम्ब नादानुपास्ते च योगी ॥ ११॥

गणेशैर्ग्रहैरम्ब नक्षत्रपङ्क्त्या
तथा योगिनीराशिपीठैरभिन्नम् ।
महाकालमात्मानमामृश्य लोकं
विधत्से कृतिं वा स्थितिं वा महेशि ॥ १२॥

लसत्तारहारामतिस्वच्छचेलां
वहन्तीं करे पुस्तकं चाक्षमालाम् ।
शरच्चन्द्रकोटिप्रभाभासुरां त्वां
सकृद्भावयन्भारतीवल्लभः स्यात् ॥ १३॥

समुद्यत्सहस्रार्कबिम्बाभवक्त्रां
स्वभासैव सिन्दूरिताजाण्डकोटिम् ।
धनुर्बाणपाशाङ्कुशान्धारयन्तीं
स्मरन्तः स्मरं वापि संमोहयेयुः ॥ १४॥

मणिस्यूतताटङ्कशोणास्यबिम्बां
हरित्पट्टवस्त्रां त्वगुल्लासिभूषाम् ।
हृदा भावयंस्तप्तहेमप्रभां त्वां
श्रियो नाशयत्यम्ब चाञ्चल्यभावम् ॥ १५॥

महामन्त्रराजान्तबीजं पराख्यं
स्वतो न्यस्तबिन्दु स्वयं न्यस्तहार्दम् ।
भवद्वक्त्रवक्षोजगुह्याभिधानं
स्वरूपं सकृद्भावयेत्स त्वमेव ॥ १६॥

तथान्ये विकल्पेषु निर्विण्णचित्ता-
स्तदेकं समाधाय बिन्दुत्रयं ते ।
परानन्दसंधानसिन्धौ निमग्नाः
पुनर्गर्भरन्ध्रं न पश्यन्ति धीराः ॥ १७॥

त्वदुन्मेषलीलानुबन्धाधिकारा-
न्विरिञ्च्यादिकांस्त्वद्गुणाम्भोधिबिन्दून् ।
भजन्तस्तितीर्षन्ति संसारसिन्धुं
शिवे तावकीना सुसंभावनेयम् ॥ १८॥

कदा वा भवत्पादपोतेन तूर्णं
भवाम्भोधिमुत्तीर्य पूर्णान्तरङ्गः ।
निमज्जन्तमेनं दुराशाविषाब्धौ
समालोक्य लोकं कथं पर्युदास्से ॥ १९॥

कदावा हृषीकाणि साम्यं भजेयुः
कदा वा न शत्रुर्न मित्रं भवानि ।
कदा वा दुराशाविषूचीविलोपः
कदा वा मनो मे समूलं विनश्येत् ॥ २०॥

नमोवाकमाशास्महे देवि युष्म-
त्पदाम्भोजयुग्माय तिग्माय गौरि ।
विरिञ्च्यादिभास्वत्किरीटप्रतोली-
प्रदीपायमानप्रभाभास्वराय ॥ २१॥

कचे चन्द्ररेखं कुचे तारहारं
करे स्वादुचापं शरे षट्पदौघम् ।
स्मरामि स्मरारेरभिप्रायमेकं
मदाघूर्णनेत्रं मदीयं निधानम् ॥ २२॥

शरेष्वेव नासा धनुष्वेव जिह्वा
जपापाटले लोचने ते स्वरूपे ।
त्वगेषा भवच्चन्द्रखण्डे श्रवो मे
गुणे ते मनोवृत्तिरम्ब त्वयि स्यात् ॥ २३॥

॥ श्रीः ॥

जगत्कर्मधीरान्वचोधूतकीरान्

कुचन्यस्तहारान्कृपासिन्धुपूरान् ।

भवाम्भोधिपारान्महापापदूरान्

भजे वेदसाराञ्शिवप्रेमदारान् ॥ २४॥

सुधासिन्धुसारे चिदानन्दनीरे

समुत्फुल्लनीपे सुरत्रान्तरीपे ।

मणिव्यूहसाले स्थिते हैमशाले

मनोजारिवामे निषण्णं मनो मे ॥ २५॥

दृगन्ते विलोला सुगन्धीषुमाला

प्रपञ्चेन्द्रजाला विपत्सिन्धुकूला ।

मुनिस्वान्तशाला नमल्लोकपाला

हृदि प्रेमलोलामृतस्वादुलीला ॥ २६॥

जगज्जालमेतत्त्वयैवाम्ब सृष्टं

त्वमेवाद्य यासीन्द्रियैरर्थजालम् ।

त्ववेकैव कर्त्री त्वमेकैव भोक्त्री

न मे पुण्यपापे न मे बन्धमोक्षौ ॥ २७॥

इति प्रेमभारेण किञ्चिन्मयोक्तं
न बुध्वैव तत्त्वं मदीयं त्वदीयं ।
विनोदाय बालस्य मौर्ख्यं हि मात-
स्तदेतत्प्रलापस्तुतिं मे गृहाण ॥ २८॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
देवीभुजंगस्तोत्रम् सम्पूर्णम् ॥